त्रिबिन्दुसहितं सदा" कामधेनुत०। "अस्याधिष्ठातृदेवतारूपं यथा "ललज्जिह्वां महारौद्रीं रक्तास्यां रक्तलोचनाम्। रक्तवर्णामष्टभुजां रक्तपुष्पोपशोभिताम्। रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम्। महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिकाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्"। मातृकान्यासेऽस्य दक्षांसे न्यास्यता। काव्यादौ प्रयोगे "रस्तु दाहम्" इ० र० टीकोक्तः दाहः फलम्।

**र** पु० रा–ड। १वह्नौ २वर्ये मेदि०। ३कामानले च शब्दर०। ४छन्दःशास्त्रप्रसिद्धे लघुमध्ये आद्यन्तगुरुयुते रगणे काव्यादौ तस्य प्रथमप्रयोगे मरणं फलम् अस्य देवताऽग्निः।

**रंह** गतौ अद० चु० उभ० सक० सेट्। रंहयति ते अररंहत् त।

**रंहस्** न० रंह–असुन्। वेगे अमरः। [शरीरकत् त

**रक** स्वादे प्राप्तौ च चु० उभ० सक० सेट्। राकयति-ते

**रक्त** न० रन्ज–करणे क्त। १कुङ्कुमे २ताम्रे ३प्राचीनामलके मेदि०। ४सिन्दूरे ५हिङ्गुले ६पद्मके राजनि०। ७शरीरस्थे रसपाकजन्ये मांसहेतौ रुधिराख्ये धातुभेदे अमरः। ८कुसुम्भे ९हिज्जले १०रोहितवर्णे च पु० ११तद्वति त्रि०अमरः। १२परागे कर्त्तरि क्त। १३अनुरक्ते मेदि०। १४क्रीडारते च शब्दचि०। कर्मणि क्त। १५नील्यादिभीरञ्जिते त्रि०। करणे क्त। १६मञ्जिष्ठायां १७लाक्षायां १८गुञ्जायाञ्च स्त्री राजनि०टाप्। भावे क्त। २०रागे न०। धातुभेदरक्तस्वरूपादिकं भावप्र० उक्तं यथा "यदा रसो यकृद्याति तत्र रञ्जकपित्ततः। रागं पाकं च संप्राप्य स भवेद्रक्तसंज्ञकः। रक्तं सर्वशरीरस्थं जीवस्याधारमुत्तमम्। स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत्"। जीवस्याधारमुत्तममिति, अत आह। "जीवो वसति सर्वस्मिन्देहे तत्र विशेषतः। वीर्ये रक्ते मले यस्मिन् क्षीणे याति क्षयं क्षणादिति"। वीर्ये रक्ते मले च शरीरारम्भके वाग्भटोक्तपरिमाणमिते शुद्धे जीवो वसति न तु दुष्टे प्रवृद्धे रक्तस्रावणोपदेशस्य वैयर्थ्यप्रसङ्गात्। पित्तवद्भवेत् अम्लवद्भवेदित्यर्थः। अथ रक्तस्य स्थानमाह "यकृत् प्लीहा च रक्तस्य मुख्यस्थानत्वयोः स्थितम्। अन्यत्र संस्थितवतां रक्तानां पोषकं भवेत्"। अस्लकरशब्दे ५५८ पृ० दृश्यम्।

**रक्तक** पु० रक्तं रुधिरमिव कायति कै–क स्वार्थे कन् वा। १बन्धूकवृक्षे २बन्धूकवृक्षे मेदि०। ३रक्तशोभाञ्जने ४रक्तैरण्डे च राजनि०। ५रुधिरे ६रक्तवस्त्रे च न०। ७अनुरागिणि मेदि० ८विनोदिनि च त्रि०।

**रक्तकन्द** पु० रक्तवर्णः कन्दोऽस्य। १विद्रुमे प्रवाले हेमच० २रक्तालौ ३रक्तपलाण्डौ च राजनि०।

**रक्तकमल** न० रक्तं कमलमिव। रक्तवर्णोत्पले राजनि०। [स्वार्थे क तत्रार्थे।

युग्मे०। रक्तकम्बलमप्यत्र न०।

**रक्तकरवीर** पु० कर्म०। रक्तवर्णपुष्पककरवीरवृक्षे राजनि०

**रक्तकाञ्चन** पु० कर्म०। रक्तवर्णपुष्पककाञ्चनवृक्षे शब्दच०।

**रक्तकाण्डा** स्त्री रक्तः काण्डोऽस्याः। रक्तपुनर्नवायाम् राजनि०। [कैरवरक्तकोकनदे अप्यत्र न० जटा०।

**रक्तकुमुद** न० कर्म०। १रक्तवर्णपुष्पककैरवे जटा०। २रक्त-

**रक्तकुसुम** पु० रक्तानि कुसुमान्यस्य। पारिभद्रे (पालदामादार) राजनि०। [२पुन्नागवृक्षे च रत्नमा०।

**रक्तकेसर** पु० रक्ताः केसरा अस्य। १पारिभद्रे राजनि०।

**रक्तखदिर** पु० शारतो रक्तवर्णः खदिरः। रक्तवर्णसारके खदिरवृक्षे राजनि०।

**रक्तगन्धक** न० रक्तेन गन्धकमिव। बोले (गन्धरस) राजनि०

**रक्तघ्न** पु० रक्तं हन्ति हन-टक्। १रोहितकवृक्षे जटा०। २दूर्वायां स्त्री शब्दच०।

**रक्तचन्दन** न० कर्म०। स्वनामख्याते चन्दनभेदे अमरः। "रक्तं (चन्दनम्) पीतं गुरु स्वादु छर्दितृष्णास्रपित्तनुत्। पित्तनेत्रहितं वृष्यं ज्वरव्रणविषापहम्" भावप्र०

**रक्तचित्रक** न० कर्म०। (लालचिता) क्षुपभेदे राजनि०।

**रक्तचूर्ण** न० कर्म०। १सिन्दूरे हारा० २रक्तवर्णचूर्णमात्रे च

**रक्तझिण्टी** स्त्री कर्म०। (नालझांटि) पुष्पप्रधानकक्षुपभेदे अमरः।

**रक्ततुण्ड** पु० रक्तं तुण्डमस्य। १शुकपक्षिणि राजनि०। २रक्तमुखके त्रि० कप्। रक्ततुण्डक भूनागे राजनि०।

**रक्ततृणा** स्त्री रक्तं तृणं यस्याः। गोमूत्रिकायाम् राजनि०

**रक्तत्रिवृत्** (ता) स्त्री कर्म०।(नालतेओडि) वृक्षभेदे राजनि०

**रक्तदन्तिका** स्त्री रक्ता दन्ता अस्याः कप् अत इत्वम्। दाडिमीस्थे दुर्गाशक्तिभेदे "भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान्। रक्ता दन्ता भविष्यन्तीति"उपक्रमे" ततो मां देवताः सर्वे मर्त्यलोके च मानवाः। स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्" देवीमा०। इति तन्नामनिरुक्तिः। [राजनि०।

**रक्तदला** स्त्री रक्तानि दलान्यस्याः। नालिकायाम् (नालते)

**रक्तदृश्** पु० रक्ता दृक् नेत्रमस्य। कपोते। रक्तनेत्रादयोऽप्यत्र